


# HAYAŚĪRṢA PAÑCARĀTRA

## (ĀDI KĀṆḌA)

Edited by
Kali Kumar Dutta Sastri

Iconographical notes by
Kalyan Kumar Dasgupta

BIBLIOTHECA INDICA—A COLLECTION OF ORIENTAL WORKS

# HAYAŚĪRṢAPAÑCARĀTRA

(ĀDI-KĀṆḌA)

*Edited By*


DR. KALI KUMAR DUTTA SASTRI

*with*

*ICONOGRAPHICAL NOTES*

*By*

DR. KALYAN KUMAR DAS GUPTA




THE ASIATIC SOCIETY

1976

BIBLIOTHECA INDICA—A COLLECTION OF ORIENTAL WORKS

# हयशीर्षपञ्चरात्रम्

( आदिकाण्डम् )

डक्टर श्री कालीकुमार दत्त शास्त्री

सम्पादित

डक्टर श्री कल्याणकुमार दाशगुप्त कृत प्रतिमा संक्रान्त टीका सह




दि एशियाटिक सोसाइटि

१९७६

Work Number—306



First Published in 1976

Published by
Dr. Bireswar Banerjee
General Secretary
The Asiatic Society
1 Park Street
Calcutta 16

Printed by
Shri K. K. Ray
Navana Printing Works Private Ltd.
47 Ganesh Chunder Avenue
Calcutta 13

*Price :* Rs. ~~40.00~~ 15.00
$ 10.00
£ 3.50

# FOREWORD

## HAYAŚĪRṢAPAÑCARĀTRA

The Asiatic Society undertook the publication of a critical edition of the text *Hayaśīrṣapañcharātra*, the oldest and the best of the literary documents of the *Pañcharātra* sect of the Vaiṣṇavas. Besides its religious bearings, the text furnishes extremely significant details relating to iconographical features of deities and architectural norms of temple construction and reconstruction. Several manuscripts of the text have been traced, and the task of collating and editing them for the use of the scholars was assigned to Prof. K. K. Dutta Sastri and the work of writing iconographical notes to Dr. K. K. Das Gupta. Due to some unavoidable reasons the publication of the volume took several years and we are sorry for it. Both Prof. K. K. Dutta Sastri and Dr. K. K. Das Gupta did their best in editing the text and compiling iconographical notes. The Society is thankful to them for their untiring efforts and interests shown in the publication of this important Vaiṣṇava text.

We believe, the scholars at home and abroad will find the text extremely useful in their academic pursuits, more particularly in the fields of religion, iconography and architecture.

Aug. 18, 1976.
The Asiatic Society,
Calcutta.

BIRESWAR BANERJEE
*General Secretary*

# सूचीपत्रम्

# HAYAŚĪRṢAPAÑCARĀTRA

## ĀDI-KĀṆḌA

## INTRODUCTION

*The Pañcarātra System* : The Pañcarātra is a sect of the Vaiṣṇavas the earliest reference to which may be found in the *Śatapatha Brāhmaṇa* (xiii. 6. 1.) in which the '*puruṣa Nārāyaṇa*' is said to have conceived the idea of '*pañcarātra satra*' or a 'sacrificial rite to be continued for five days. In the 'pāñcarātra' circle, however, the word 'rātra' came to be interpreted differently. The apocryphal Nāradīya takes the word 'rātra' to mean 'knowledge' and speaks of five kinds of 'rātras', namely, Tattva (Ontology or Cosmology), Muktiprada (Liberation), Bhaktiprada (Devotion), Yaugika (Yoga or meditation) and Vaiśeṣika (the objects of senses).[1] Our text seems to represent a different school of thought according to which the word 'rātra' means 'night' which is equated with the five Mahābhūtas and which holds that the Supreme Being is above all the qualities (nirañjana), and being known causes salvation by dint of which man becomes identical with Viṣṇu himself. The text, therefore, that imparts this knowledge of the Supreme Being and helps to distiguish the 'nights' from the Ultimate Reality is known as Pañcarātra (Hayaśīrṣa, I. 4. 1.—3). The Agnipurāṇa, a Puranic text of the Bhāgavats of the Pāñcarātra sect, however, speaks of a 'saptarātra' also but the term has not been explained there (Agni, 39. 1.)

In the *Mahābhārata*[2] (XII. 338. 4.) the word 'pāñcarātrika' is used as an epithet of Viṣṇu and Pāñcarātra also occurs in XII. 349. 1. The *Harṣacarita of Bāṇa* (7th cen.) names in its Ucchvāsa, VII the Pāñcarātras along with the Bhāgavatas. The '*caturvyūha*' or the quadruple emanations of Viṣṇu,* namely, Kṛṣṇa, Vāsudeva or Nārāyaṇa,

---

[1] Introduction to the Pañcarātra and the Ahirbudhnya Saṃhitā, F. O. Shrader, Adyar, Madras, 1916, Intro. p. 24.

[2] Mahābhārata, ed. Gita Press, Gorakhpur.

* In the *Vahvṛca Upaniṣad* the 'caturvyūha' consisting of Śarīra-puruṣa, Chandaḥ-puruṣa, Veda-puruṣa and Mahā-puruṣa has been referred to. But that has no connection with the 'caturvyūha' of the Pañcarātra school.

Saṃkarṣaṇa, Pradyumna and Aniruddha have been referred to in the *Mahābhārata* (XII.339.33-40) and the *Mahābhāṣya* of Patañjali (C. 150 B.C.) in the passage—"Janārdanaś cātmacaturtha eva" (under, VI. 3. 6.)—has a clear reference to it. The 'caturvyūha' has been included in the group of '*puruṣāvatāras*' in the Bhāgavata (I. 3.).* Hayaśirṣa has been referred to in the *Mahābhārata* (XII. 339. 60.). The *Agnipurāṇa* depicts Hayagrīva as the speaker in its chapter 39 and two subsequent chapters. It also praises the gift of the manuscript of Pañcarātra (79. 63.) and recommends for the worship of Hayagrīva (XLII. 24.). It is also interesting to note here that the Hayagrīva form of Viṣṇu used to be worshipped in temples and the Śilpa text of *Śrīkumāra* (16th cen.) describes for the image-makers how to make the image of that deity.[3] Hayagrīva or Hayaśīrṣa stands as the central figure in the legends of rescue of the Vedas from the waters of the great 'deluge' which is described in our text (I. 1. 9.) as 'ekārṇavajala' and the same expression may be found in the Mahābhārata and also in the inscription of Rudradāman.[4] In this connection our text refers to the Madhukaiṭabha legend which is narrated also in the *Mārkaṇḍeyapurāṇa* in a substantially different form. The features of the Hayagrīva image have been described in our text as having four arms wielding mace, disc, lotus, and bow, moonwhite in his complexion and his head is like that of a horse. The *Śāradātilaka*,[5] however, describes the same deity with two arms only and *Rāghavabhaṭṭa*, its commentator, has four arms of the god wielding rosary, lotus, book and 'varamudrā' on the authority probably of the *Śāṅkarakalpa*. The *Garuḍapurāṇa*[6] echoes our text. The *Śilparatna* makes him white-complexioned, seated on a throne and explaining to the disciples with 'vyākhyānamudrā'. But the Agnipurāṇa (46. 7.)

* "Yad vai aśvaśiro nāma" (Bhāgavata, VI. 9. 52) speaks of Aśvaśiras and Jīvagosvāmin tells us that the term has been used there with reference to the sage Dadhici, who in his form with the head of a horse imparted the science of Brahmavidyā to the Aśvins. For this reason the science is called Hayagriva Brahmavidyā otherwise known as the Nārāyaṇavarman. (Bhāgavatasandarbha, ed. Nityasvarupa Brahmacārī and Krishna Chandra Goswami, Calcutta, Chaitanyabha, 433) It is interesting to note that the Hayaśirṣa here is identified with the sage Dadhici.

[3] Śilparatnam, II., ed. K. Sambasiva Sastri, TSS, XCVIII. 1929, pp. 126, 131-32.

[4] "Parjanyena ekārṇavabhūtāyām iva pṛthivyāṃ kṛtāyām"—line 5.

[5] Vol. II, Paṭala 15, ed. Arthur Avalon, Tantrik Texts, Vols. XVI-XVII., Calcutta, 1933.

[6] Ed. Mm. Pancanan Tarkaratna, Vangavasi, Calcutta, 1338 BS, Pūrvakhaṇḍa, chap. 34.

in course of describing the '*Śālagrāmamūrtis*' has blue-coloured Hayagrīva. *The Caturvargacintāmaṇi*[7] makes 'Hayānana' identical with the Sāmaveda having two arms, holding rosary and conch and blue-complexioned, and the *Viṣṇudharmottara* (III. 8.) also speaks of the Hayagrīva image in blue garments and placing his feet on the hands of the image of goddess Earth. All these variations clearly indicate the influence of different sectarian conceptions of the icon but the chronology of these developments is not certain.

The *Ahirbudhnya-Saṃhitā* holds the 'Pañcarātra-mārga' as superior to the 'Veda-mārga' and in some Pañcarātra texts undue emphasis is laid on some such rites as are manifestedly non-Vedic. These possibly created a sharp reaction in the Vedic parlour and consequently we see that the *Kūrmapurāṇa* (I. 12. 266-68; II. 16. 15-16 and elsewhere) condemns the Pāñcarātras along with the followers of the Tantras. The *Brahmapurāṇa* cited by *Yāmunācārya* in his *Āgamaprāmāṇya* (p. 8.) states that the 'Sātvatas' identified with the Vṛṣṇis were mercenary worshippers in temples and according to Yāmunācarya they were the followers of Pañcarātra and they were popularly nicknamed as 'Devalakas'. In his *Bṛhatsaṃhitā* (60. 19.) Varāhamihira also refers to the Bhāgavatas as worshippers in Viṣṇu temples. Manu, Yājñavalkya and Āśvalāyana are openly antagonistic to the Pāñcarātras and in Manu, X. 23. Sātvatas are described as low-caste people of hybrid origin having no sacred thread. *Kumārila* in his *Tantravārttika* and the Vedāntins (*Brahmasūtra*, II. 2. 43-45.) refute the Pañcarātra doctrines. The *Mahābhārata* (XII. 335-349.) tells us that the *Citraśikhaṇḍins* propounded the Pañcarātra system and made it equal to the Vedas. This has been interpreted by some as a sly hint that makes the Pañcarātra non-Vedic, if not anti-Vedic. Yāmunācārya also records an argument according to which the Pañcarātra is non-Vedic as it admits of the twofold systems, Vaidika and Tantrika.[8] There are also many other reasons that made the Brahmanical tradition antagonistic to the Pāñcarātras. They freely initiated the Śūdras and the women and allowed them to worship for

[7] Vratakhaṇḍa, Pt. I., ed. Bharatchandra Siromani, Samvat 1934, p. 104.

[8] "Vaidikaṃ tāntrikaṃ ceti vibhāgakaraṇād api /
Gamyate pañcarātrasya vedabāhyatā-niścayaḥ" // cited in the Āgamaprāmāṇya of Yāmunācārya, p. 26, E. Svamirama Sastri, Benares, *1900*.

themselves.[9] They had no restriction to include within the fold of the Bhāgavatas the casteless foreigners and allowed the Kṣatriyas and the Vaiśyas also to do the job of the preceptor (HŚ., I. 2. 15-16). Then again, notwithstanding the respect shown to the Vedas, they ordain that the required best qualifications of their 'ācārya' are the adherence to Viṣṇu and proficiency in the tenets of the Pañcarātra alone, which implies that the 'ācārya' of the Pañcarātras may be ignorant of the Vedas. (HŚ., I. 4. 5-9). This clearly shows that the Vedas are not of much importance in the eyes of the followers of Pañcarātra though in the rituals they employ various Vedic mantras to grace the occasion (HŚ., I. 11. 28-30.). The worship of the 'liṅga', deities of the 'Śakti' cult and the Puranic gods like 'Skanda' and others tend to suggest that the old 'Bhāgavata' sect of which the Pañcarātra is an offshoot, made an attempt to integrate the Tantric and the Puranic systems also into their own tenets, of course, with a strong Viṣṇuite bias, by the passage of time.

*Literature of the school* : The ancient literature of the Pañcarātra school appears to be a vast one and *Schrader*[10] gives a list of about 215 texts on the Pañcarātra. Our text (I. 2. 2-6.) gives a list of 25 authoritative texts of the Pañcarātra along with an account of some other texts that are common to all of the Bhāgavata sects (I. 2. 8-9.). Agnipurāṇa says ditto to the list and the *Mantrakaumudī* of the celeblated Maithila scholar Devanātha Tarkapañcānana (16th cen.) reproduces the same. The Hayaśīrṣa is held to be the 'ādya' (the best or the earliest) of all these texts. The original text is said to have been narrated by Brahmā to Maheśvara and the sage Mārkaṇḍeya entreated by Bhṛgu reproduces the old text to him in the form of the present text. Yāmunācārya[11] informs us that according to the Mahābhārata and the Skandapurāṇa, Keśava is the 'vaktā' or the first narrator of the Pañcarātra. Possibly this relates to the school and not the text.

*Nature, contents and extent* : The Hayaśīrṣa Pañcarātra is written thoroughly in the Puranic style and language and includes as such a number of un-Pāṇinian words in the fashion of the Purāṇas, a list of

---

[9] Why Pañcarātra was condemned as non-Brahmanic, S. R. Bhatt, IHQ., 39. pts. 1-2, 1939, pp. 21-26.

[10] op. cit., pp. 4-13.

[11] op. cit., p. 64.

* "Sāṁkhyasya kapilo vaktā pañcarātrasya keśavaḥ /
Iti skandapurāṇe'pi paṭhyate bhārate tathā" //

which we propose to append at the end of the last volume. The whole work is written in the verses of 'anuṣṭubh' metre interspersed with some 'mantra' portions in prose. The diction is generally graceful and technical terms are freely used specially in connection with scuptural and architectural matters, but these terms are conventional. The text is complete in *four books* (*Kāṇḍas*) and they are : *Ādi, Saṃkarṣaṇa, Laiṅga and Saura*. Each of these Kāṇḍas are divided into several sections named '*paṭalas*'. The whole work is said to be a collection of 12,000 ('dvādaśasāhasrika') 'granthas' and possibly not of the verses as supposed by some scholars. A grantha, (also called a 'śloka') according to the scribal tradition, is made of 32 syllables and the text available to us contains approximately 11,538 such granthas. If, however, the expression 'dvādaśasāhasrika' is used with reference to the verses, then we must have to presume that almost half of the text is now lost to us.

The text describes itself as a 'pratiṣṭhātantra' (I. 1. 28.; I. 3. 14.) and mainly deals with such topics as the details of Architecture in relation to construction and reconstruction of temples, assembly halls and such other structures, mostly in conformity with the Northern school, installation and construction of images, copying and donation of manuscripts, erection of banners, dedication of wells and tanks, salvage of wrecked ones and various other topics connected with all these things. Philosophical topics came up only incidentally and these are dealt with in a succinct manner. The text is looked upon as an authoritative work on 'smṛti' and the Vaiṣṇavas of Bengal appear to have a special fascination for it. *Halāyudha* and *Raghunandana*, the great smṛti scholar of Bengal (16th cen.) in his *Maṭhaphatiṣṭhātattva*[12] cite our text in connection with the measurement of the flag-pole etc. *Rūpagosvāmin*, the great Chaitanyaite saint, cites from it in his *Laghubhāgavatāmṛta*[13] and the *Ṣaṭsandarbha* of *Jīvagosvāmin* has a number of quotations from it (as in I. 53.; II. 645.; V. 567.; V. 633 etc.).* *Gopālabhaṭṭa*,[14] one of the six chief Gosvāmins of the Chaitanya Order, cites copiously from the first and the second Books of our text in his *Haribhaktivilāsa*. There

[12] I. 44. 3.; I. 44. 25-31. and from the 2nd Book to be noted in the appendix. Ed. Srirampore, 1835, vol. II., pp. 349-359.

[13] Ed. Radharaman Press, Murshidabad, 1303 BS., pp. 208, 243.

* vide also the *Śrībhaktisandarbha*, ed. Krishnagopal Goswami, C.U., 1962, pp. 144, 328f., 334, 503.

[14] Ed. Behrampore, 1298 BS.

are, however, sufficient reasons to believe that the original work suffered interpolations in some places though the number of such passages are insignificant.

*Provenance* : About the provenance of the work, we agree with Prof. Dinesh Chandra Bhattacharya that it originated somewhere in the Northern part of India though the manuscripts of the work are found mostly in Bengali script, the earliest of which dates 1531 A.D. In his Maṭhapratiṣṭhātattva[15] Raghunandana states—"Iti Vallālasenadevāhṛta-dvikhaṇḍākṣaralikhita-Hayaśīrṣapañcarātrīyasaṃkarṣaṇakāṇḍe Samudaya-paṭalaḥ"—and this is a reference to the tradition current in his time regarding the manuscript of the Hayaśīrṣa. We are not sure what the expression 'dvikhaṇḍākṣara' exactly means, but the statement leads to the conclusion that the text of the Hayaśīrṣa was not available in Bengal in the 12th century and *Vallāla*, a zealous patron of learning, was able to procure, evidently with great deal of efforts, a copy of the same and it may be the case that all other manuscripts that appeared in the field subsequently, originated from this very source preserved in the royal library of Vallāla. Then again, the Hayaśīrṣa (I. 3. 2-15.) appears to be unfavourably disposed not only to such people as the Śivaites, Sauras[16] (though it has a Saurakāṇḍa for the worship of Sūrya), Jains (nagnas) and the heretics, but also to the people hailed from Kāñcī, Koṅkaṇa, Kāverī, Mahārāṣṭra, Kosala, Kāśmīra, Kāmarūpa and Kaliṅga who are debarred from working as 'ācārya' or 'deśika' in Pañcarātra rituals. Prof. Bhattacharya thinks that the people of these frontier regions being of predominantly 'Śaiva' or 'Śākta' inclination are singled out for rejection on purely sectarian grounds. It is, however, interesting to note here that for the transcription of manuscripts the text prescribes the Kāśmīra and Nāgara scripts only[17] and no other script finds favour with it (HŚ., II. 36. 10.). This is rather very intriguing.

*Date* : About the date of the work Prof. Bhattacharya places it tentatively in the neighbourhood of the 8th century A.D. The two main grounds of his conclusion are : (i) In the list of Vaiṣṇava works it refers to a *Bhāgavatatantra* (I. 2. 8-9) besides several Purāṇas and

---

[15] op. cit., p. 352.

[16] Are we then justified to read the word as 'Śaura' meaning the inhabitants of Śūrasena or Mathurā ?

[17] The Ritual of Manuscripts, K. K. Dutta, Our Heritage, Vol. XIX, Pt. I., 1971, pp. 15-44.

Saṃhitās. It is, however, not certain if this refers to the *Bhāgavata* as *Jīvagosvāmin* in his *Tattvasandarbha*[18] refers to *Tantrabhāgavata* which is to be looked upon as a commentary on the Bhāgavata. But this argument is not sufficiently convincing. Because the word 'tantra' in this context may have different interpretations. (ii) In this text the tirade against the philisophical systems of Jaimini, Buddha, Cārvāka, Jina, Kapila and Gautama (I. 5. 2.) must have a reference to the views amongst others of the great *Kumārilabhaṭṭa* who refutes the Pañcarātra doctrine in his *Tantravārttika*. This second ground also may or may not be true, but it is, of course, certain that the Agnipurāṇa is not only acquainted with our text, but actually summarises (Agni, 39, 42.) some its 'paṭalas'.[19] Then again, the text gives the features of some of the deities that belong to the earlier periods side by side with some of them belonging to later periods. Details of these will be given in the following parts of this introduction. These lead to the conclusion that the text originated earlier, i.e., nearabout the 6th century A.D. but it continued to grow until it reached its present form sometime in the 7th century or in the neighbourhood of that period.

*Apparatus Criticus* : The only printed edition of the text available is the First Kāṇḍa of the text printed in two parts by Late Pandit Bhuvan Mohan Sāṅkhyatīrtha with a Foreword by Prof. Dinesh Chandra Bhattacharya and Introductory Notes by Sri Kshitish Chandra Sarkar, published by the Varendra Research Society, Rajshahi (East Pakistan), in 1953 and 1956. This edition has been referred to as *Var. ed.* in our edition.

A.,B.,C. — These refer to the mansucripts utilised by the editors of the Varendra Research Society Edition.

D. — Refers to the Photo copy of the Paris manuscript No. 848 (Bibl. Nationale), ASB. Ms. No. V.A. 6. (13390). It is a palm-leaf ms. in Bengali script dated 1453 Śakābda, that is 1531 A.D. No. of fols. 126. Contains Adi and Saṃkarṣaṇa Kāṇḍas.

E. — Refers to the Calcutta Sanskrit College Manuscript, No.

[18] Ed. Satyananda Gosvami, Bhagavata Dharmamandala, Calcutta, 1318 BS., "Yasyaiva Bhāgavatasya bhāṣyabhūtam Śrīhayaśirṣapañcarātre Śāstraprastāve gaṇitaṃ Tantrabhāgavatābhidhaṃ tantram."

[19] The Ritual of Manuscripts, op. cit.

Tantra 1531. It is a paper manuscript written in old Bengali script. It contains 117 fols. Incomplete and worn out. The ms. gives the Ādikāṇḍa (almost the same as ABCD.) and ends abruptly near the end of the Avabhṛtasnānapaṭala of the Saṃkarṣaṇakāṇḍa. It gives the Narasiṃhavidyāpaṭala separated from the Narasiṃhapratiṭṣhāpaṭala which is actually not a separate Paṭala. It omits the Kūpavāpīpratiṭṣhāpaṭala.

F. — It is also an incomplete and worn out paper manuscript in Bengali script, containing 54 fols. It has the whole of the Ādikāṇḍa and the Saṃkarṣaṇakāṇḍa up-to the Caturmukhasthāpanapaṭala. At the end there are two fols. containing different matters. No. Tantra, 158, Sanskrit College, Calcutta.

G. — This is Sanskrit College Manuscript No. Tantra, 1549. It contains 37 stray fols. mostly from the Ādikāṇḍa. Fols. marked 60 to 90 are, however, intact and consecutive. Other fols. are mutilated and worn out. It seems to have some portions of the ms. F. wrongly separated from the Saṃkarṣaṇakāṇḍa of the latter. It ends at the end of the Fol. marked 97. Almost all pages are damaged. At the end of it we have a note : "Śrīcandramādhavanyāyavāgīśasya pustīyam."

H.,I.,J. — This three mss. have been collated and copied by Sri Haripada Kavyatirtha who kindly prepared for us the press copy of the Saṃkarṣaṇakāṇḍa. These belong to the private library of Late Bhuvanamohana Sāṃkhyatīrtha who in his lifetime kindly left the manuscript at the disposal of Sri Haripada Kavyatirtha for copying for the use of the latter. All these are paper manuscripts written in Bengali script.

K. — This is the Adyar Libary ms. No. TR 567-1, Vols. I, II. copied by one Jagannātha Mahīsura in 1851 A.D. It is complete in all the four Kāṇḍas of the work. The transcript copy of the ASB. No. III. H. 444-447 contains 842 pages in all, written in Nagari script.

We are indebted to Dr. Saṃyuktā Guptā for kindly supplying us the call No. of this ms. We gratefully thank her for this help.

L. — It is a dated ms. belonging to Pandit Manindra Mohan

Chowdhury of Malda, West Bengal. It has 145 pages only and gives the whole of the Saurakāṇḍa in 40 Paṭalas. The readings of this ms. are, on the whole, almost the same as those of the Adyar ms. but the order of the Paṭalas are widely at variance. These will be considered by us in course of discussing the 'reading' at the and of the last volume.

This ms. originally belonged to Śrī Manomohana Devaśarmā of the Ishapsahi Pargana and was copied in Śak. 1574 corresponding to 1652 A.D.

After the release of the first Kāṇḍa of this work from press, the present editor of the text was able to find out *four* other manuscripts of the work noted below :

2 manuscripts containing the Saṃkarṣaṇa-kāṇḍa (Incomplete).

1 manuscript containg the Ādikāṇḍa (Incomplete).

1 manuscript containing the Śrīvivāhapaṭala (a chapter of the Saṃkarṣaṇakāṇḍa) (complete).

It is proposed that the results of comparing and study of these four manuscripts will be added as an Appendix at the end of the book.

KALI KUMAR DUTTA SASTRI

# ह य शी र्ष प ञ्च रा त्र म्

## आदिकाण्डम्

### प्रथमः पटलः

ॐ नमो विघ्नेश्वराय[1]

मार्कण्डेय उवाच—

कथं हयशिरा विष्णुः प्रादुर्भूतः पुरा विभुः ।
किं निमित्तश्च देवेशो दधार रुचिरं वपुः ॥ १ ॥
हयशीर्षं जगत्स्वामी पुरा नारायणः प्रभुः ।
श्रुतमासीच्च भवता यदुक्तं परमेष्ठिना ॥ २ ॥
आद्यं यत् पञ्चरात्राणां तन् ममाचक्ष्व पृच्छतः ।[2]

भृगुरुवाच—

शृणु वत्स प्रवक्ष्यामि पञ्चरात्रं पुरातनम् ॥ ३ ॥
सप्तिक-शीर्षं नमस्कृत्य यस्माद् भक्तोऽसि केशवे ।
तस्मादर्हसि तच् छ्रोतुं पञ्चरात्रं पुरातनम् ॥ ४ ॥[3]
पुरा किल विरूपाक्षः सार्धं गौर्या महेश्वरः ।
चतुर्मुखश्च[4] पप्रच्छ वैराजभवने स्थितम्[5] ॥ ५ ॥

महेश्वर उवाच—

पञ्चरात्रं पुरा पृष्टस्त्वया हयशिरा विभुः ।
मधुकैटभयोर्हन्ता सैकार्णवजले विभुः ॥ ६ ॥

[1] ॐ नमो गणेशाय—B.C.D. [2] पूर्वतः—B.C. क सप्त—D. [3] This verse is omitted in B,C. [4] चतुर्मुखं स—B,C. [5] स्थितः—B,

समर्पितेषु वेदेषु[6] चतुर्ष्वेव महामते ।
तत् सर्वं मे समाचक्ष्व विस्तराच् चतुरानन ॥ ७ ॥

ब्रह्मोवाच*

एकार्णवे दुरालोके नष्टे स्थावर-जङ्गमे ।
नष्टचन्द्रार्कपवने विनष्टग्रहतारके ॥ ८ ॥
शेषपर्यङ्कमासाद्य सुप्ते देवे जनार्दने ।
शृणु वै[7] यत् तदा वृत्तमेकार्णवजले पुरा ॥ ९ ॥
शेते योऽर्णवमध्यस्थो नागशय्यागतः प्रभुः ।
नारायणः स भगवान् आदिदेवः पुरातनः ॥ १० ॥
संहृत्य सर्वलोकान् वै योगनिद्रावशं गतः ।
तस्य सुप्तस्य देहे तु तेजो दिव्यं महद् विभोः ॥ ११ ॥
पद्मरूपेण नाभौ तु प्रभूतं[8] निर्जगाम ह ।
प्रदीप इव तत् पद्मं प्रदीप्तं विष्णुतेजसा ॥ १२ ॥
सहस्रादित्यसङ्काशं सहस्रदलकेशरम् ।
ततो नारायणो देवस्तेजसा तेन वै सृजत् ॥ १३ ॥
हिरण्यमण्डं भगवान् गर्भस्तस्मिन्नहं पुनः ।
द्विधा चाकरवं[9] तूर्णमण्डं तत् तु[10] हिरण्मयम् ॥ १४ ॥
तत्र चेदं महद्रूपं[11] हिरण्मयमिदं मम ।
चतुर्बाहु चतुर्वक्त्रं जटामुकुट[ख]-मण्डितम् ॥ १५ ॥
एवंभूतवपुः सोऽहं तस्मिन् पद्मे व्यवस्थितः ।
आवर्तयं[12]स्तदा वेदान्[13] साङ्गोपाङ्गपदक्रमान् ॥ १६ ॥

[6] A's reading is corrupt here. [7] मे—B,C. [8] तत्प्रसूतं—B,C. [9] चकार वै —B,C. [10] असुप्तं तु—B,C. [11] कूपं—B,C. [ख] मकुट—D. [12] अवर्तयं ( अवणयं ? ) —B,C. [13] वेदं—A. *Here B,C. add—द्विधा चकार वै तूर्णं मण्डलं तु हिरण्मयं । But in consideration of 14b this seems to be redundant. A omits it. So also D.

उपासाञ्चक्रिरे मह्यं वेदा देहभृत[14]स्तदा ।
वेदाभ्यासरतेस्तत्र स्वेदबिन्दुरजायत ॥ १७ ॥
स पद्मपत्रमासाद्य द्विधाभूतोऽपतत् तदा ।
रजस्तमोमयौ तस्माज् जातौ दैत्यौ बलोत्कटौ ॥ १८ ॥
मधुकैटभनामानौ महाबलपराक्रमौ ।
ततस्तौ मम वेदान् वै जह्रतुः पापनिश्चयौ ॥ १९ ॥
सशरीरेषु वेदेषु हृतेष्वथ महेश्वर[15] ।
बोधितोऽसौ मया देवः पद्मनाभस्य चाननात् ॥ २० ॥
स विबुद्धस्तदा देवः कृत्वा हयशिरो वपुः[ग] ।
शशाङ्कशतसङ्काशं नानाभरणभूषितम् ॥ २१ ॥
चतुर्भुजं गदाचक्रपद्मशार्ङ्गधरं[16] शुभम् ।
द्वितीयेन शरीरेण रसातलतलं गतः ॥ २२ ॥
तेनाश्वशिरसा गत्वा वेदान् आदाय शाश्वतान् ।
पौष्करं[17] भवनं दिव्यं महर्षिगणसेवितम्[18] ॥ २३ ॥
सोऽप्यसौ प्रददौ वेदान्[घ] भूय एव जगद्गुरुः ।
तस्मिन् काले मया पृष्टो देवो यत् तत् शृणुष्व मे ॥ २४ ॥
कियन्ति पञ्चरात्राणि त्वया प्रोक्तानि वै पुरा ।
कथं ते स्थापनं देव क्रियते मुक्ति[19]-काङ्क्षिभिः ॥ २५ ॥
आचार्यमूर्तिपानां च कीदृशं लक्षणं विभो ।[20]
वास्तुयागविधानं च अर्घ्यदानविधिं तथा ॥ २६ ॥
शिलान्यासविधानं च क्षेत्रादि[ङ]-साधनं तथा ।
प्रासादलक्षणं चैव[21] प्रतिमालक्षणं तथा ॥ २७ ॥
प्रतिष्ठापञ्चकं सर्वं ध्वजारोहविधिं[22] तथा ।

[14] दरभृतः—B,C. [15] महेश्वरः—A,B. [ग] शिरोधरम्—A,B,C. [16] शङ्खपद्मधरं—B,C. [17] पौष्करं—A ; पौष्णकं—B,C. [18] गणभूषितम्—B,C. [घ] देवो—D. [19] भुक्तिव—A,B. ; भक्ति—C. [20] This line is omitted in B,C. [ङ] ...दिक्—D. [21] सर्वं—A. [22] विधिः—A.

यदप्यन्यद् भवेत् पृष्ट[23]-प्रतिष्ठाङ्गं सुरेश्वर ॥ २८ ॥
अज्ञानाद् वा[24] प्रमादाद् वा[25] यन् मया नानुकीर्तितम् ।
तत् सर्वमखिलं देव प्रसादाद् वक्तुमर्हसि ॥ २९ ॥
॥ १ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके आदिकाण्डे
शास्त्रावतारो नाम प्रथमः पटलः[26] ॥ १ ॥

## द्वितीयः पटलः

श्रीभगवान् उवाच—

यत् त्वया पृष्टमखिलं तत् सर्वं कथयामि ते ।
प्रोक्तानि पञ्चरात्राणि कल्पे कल्पे पुरा मया ॥ १ ॥
व्यस्तानि मुनिभिर्लोके पञ्चविंशतिसंख्यया ।
आद्यं समस्ततन्त्राणां हयशीर्षं प्रकीर्तितम् ॥ २ ॥
त्रैलोक्यमोहनं तन्त्रं वैभवं पौष्करं तथा ।
नारदीयं तथा तन्त्रं प्राह्लादं[1] गार्ग्य-गालवम् ॥ ३ ॥
श्रीप्रश्नं शाण्डिलं तन्त्रं तन्त्रमीश्वरसंहिता ।
सत्योक्तमुत्तमं[2] तन्त्रं वाशिष्ठं शौनकं तथा ॥ ४ ॥
नारायणीयमन्यच्च तन्त्रं ज्ञानार्णवं तथा ।[3]
स्वायम्भुवं कापिलं च विहगेन्द्रं तथापरम् ॥ ५ ॥
आत्रेयं नारसिंहाख्यमानन्दाख्यं तथारुणम् ।
बौधायनं तथा तन्त्रं तन्त्रं वैश्वावतारितम्[4] ॥ ६ ॥

[23] पृष्टं—A ; लक्ष्म—B.C. [24] च—B,C,D. [25] च—B,C. [26] प्रथम पटलम्—A,B. ( पटल has been used indiscriminately in masculine as well as in neuter in almost all the mss.) इति हयशीर्षं पञ्चरात्रे प्रथमपटलम्—D. [1] प्राह्लादम्—A,C. [2] सत्योक्तयुक्तमत् (?)—B,C. [3] ज्ञानस्व कारणम्—B,C. ; ज्ञानप्रकाशकम्—D. [4] विश्वाभिभाषितम्—B,C.

अष्टाक्षरविधानं तु महातन्त्रं तदुच्यते ।
समासैर्विस्तरैरेते भूतलं व्याप्य संस्थिताः ॥ ७ ॥
तन्त्रं भागवतं चैव शिवोक्तं विष्णुभाषितम् ।
पद्मोद्भवं पुराणञ्च वाराहञ्च तथापरम् ॥ ८ ॥
इमे भागवतानां तु[5] तथा सामान्यसंहिता ।
व्यासोक्ता संहिता चान्या[6] तथा परमसंहिता ॥ ९ ॥
यदन्यन्मुनिभिर्गीतमेतेष्वेवाश्रितं हि तत् ।
प्रतिष्ठाद्येकदेशञ्च[क] तत् सर्वं विष्णुभाषितम् ॥ १० ॥
कर्तुमिच्छति यः[7] पुण्यं मम मूर्तिप्रतिष्ठया ।
अन्वेषणीयस्त्वाचार्यस्तेन लक्षणसंयुतः ॥ ११ ॥
संशुद्धब्रह्मयोनिस्तु प्रलयोत्पत्तिसंस्थितिम्[8] ।
यो वेत्ति कुलजो धीमान् आचार्यत्वं तु[9] सोऽर्हति ॥ १२ ॥
ब्राह्मणः सर्ववर्णानां पञ्चरात्रविशारदः ।
क्रोधलोभविनिर्मुक्तो दोषमात्सर्यवर्जितः ॥ १३ ॥
क्षयापस्माररहितः कुष्ठरोगविवर्जितः ।
अन्यूनानतिरिक्ताङ्गो युवा लक्षणलक्षितः ॥ १४ ॥
अनन्यदेवताभक्तः[10] शूद्रान्नपरिवर्जितः ।
ब्राह्मणानामलाभे तु क्षत्रियो वैश्यशूद्रयोः ॥ १५ ॥
क्षत्रियाणामलाभे तु वैश्यः शूद्रस्य कल्पितः ।
कदाचिदपि शूद्रस्तु न चाचार्यत्वमर्हति ॥ १६ ॥
गृहस्थं ब्रह्मचर्यस्थं ककाराष्टकवर्जितम् ।
गुरुं कुर्वीत सततम् उपवासव्रते रतम् ॥ १७ ॥
ऋजुस्वभावं मधुर[11]-स्मितपूर्वाभिभाषिणम्[12] ।
एवंविधेन गुरुणा स्थापिते पुरुषोत्तमे ॥ १८ ॥

[5] च—B. [6] चव—B,C. [क] देशं तु—D. [7] यत् (?)—B,C. [8] संस्थितः—B,C.
[9] च—B,C. [10] अभावे—B,C. [11] मधुरं—A. [12] भाषितम्—B,C.

तद्देशाधिपतिर्यष्टा शिल्पिनः स्थापकादयः ।
प्रतिनन्दन्ति सुचिरं[13] सर्वे ते नात्र संशयः ॥ १६ ॥
॥ २ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे पञ्चरात्रस्वरूपनिरूपणं नाम
द्वितीयः पटलः ॥ २ ॥

## तृतीयः पटलः

श्रीभगवान् उवाच—

स्थापकान् संप्रवक्ष्यामि विपरीतैर्गुणैर्[1]युतान् ।
तन्त्रेऽस्मिन् वर्जिता ये च प्रतिष्ठां तैर्न कारयेत् ॥ १ ॥
शैवः सौरो[क] नैष्ठिकश्च नग्नः सङ्करजोऽशुचिः ।
वृद्धः कुत्सितमूर्तिर्यो महापातकचिह्नितः ॥ २ ॥
कुष्ठी च कुनखी श्वित्री श्यावदन्तः क्षयी तथा ।
कच्छदेशसमुत्पन्नः कावेरीकोङ्कणोद्गतः ॥ ३ ॥
कामरूपकलिङ्गोत्थः काञ्चीकाश्मीरकोशलः ।
कुवृत्तिश्च कुसङ्गश्च महाराष्ट्रसमुद्भवः ॥ ४ ॥
कुबुद्धि[2]श्चाथ लम्बोष्ठी निष्ठीवी[3] घर्घरस्वरः ।
अर्बुदी गारुडी व्यङ्गो[4] गर्वितो वधिरस्तथा ॥ ५ ॥
तन्त्रविद्वेषकश्चैव परद्रोहरतस्तथा ।
कुण्डः काकस्वरः क्लीवः कातरः क्रोधनस्तथा ॥ ६ ॥
पुनर्भूश्च स्वयम्भूश्च गोलको नास्तिकस्तथा ।
जडोऽतिगौरः खल्वाटो[5] हीनाङ्गः स्थूल एव वा[6] ॥ ७ ॥

[13] स्थविरं—A. [1] विपरीतगुण—A. [क] शौर—D. [2] कुवृत्तिः—B,C. ; अवृत्तिः—D. [3] निष्ठीव—B,C. [4] व्यङ्गी—B,C,D. [5] खल्वीटः—A,D ; खन्दीचः—C ; खल्लाटः—[illegible]दटींका। [6] च—A.

अतिकृष्णोऽघृणः पापी कृशो ह्रस्वोऽलसस्तथा ।
व्यापन्नोऽसंस्कृतश्चैव उद्विग्नो दीन एव वा[7] ॥ ८ ॥
व्रतोपवासहीनश्च वृषलीपतिरेव च ।[8]
पण्यरङ्गोपजीवी च पण्यस्त्रीपारदारिकः ॥ ९ ॥
आचार्यपुत्रकादीनां विद्वेष्टा परसेवकः ।
भोजकः सेवकश्चैव व्यसनी पिशुनो[9] गदी ॥ १० ॥
अतिरोगी भिषक् चैव साहसी समयच्युतः
द्विजातिगुरुदेवानां निन्दकः स्थापकस्तथा ॥ ११ ॥
पिङ्गाक्षो मधुवर्णाक्षो[10] विडालाक्षस्तथैव च ।
मत्सरी गण्डमाली च वकवृत्तिरतस्तथा ॥ १२ ॥
उपायदेशहीनश्च कक्खटः[11] कुत्सितव्रतः ।
निर्दयश्चैव निःसत्त्वो नैपुण्यपरिवर्जितः ॥ १३ ॥
प्रतिष्ठातन्त्ररीतिज्ञो[12]ऽवेद[13]-वेदाङ्गपारगः ।
वर्जयेत्[14] तु प्रयत्नेन सर्वज्ञमपि नास्तिकम् ॥ १४ ॥
पद[15]-वाक्यप्रमाणज्ञो ब्राह्मणो वेदपारगः ।
रञ्जितः पशुशास्त्रेण नाचार्यो न स[16] देशिकः ॥ १५ ॥
.... .... .... .... .... ....
एतैः संस्थापितो देवः फलदो[17] न कथञ्चन ॥ १६ ॥
यद्येतैर्वर्जितैर्विष्णोः स्थापनं क्रियते क्वचित् ।
असाधकं भुक्तिमुक्त्योर्निष्फलं तन्न संशयः ॥ १७ ॥

॥ ३ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे वर्जनीयाचार्यलक्षणं नाम
तृतीयः पटलः ॥ ३ ॥

[7] च –A. [8] This line is omitted in A. [9] पिशुनी—A. [10] धूमवर्णाक्षः—B,C. [11] कक्खलः—A,D ; कक्कटः –B. [12] किञ्चिज्ज्ञः –B,C,D. [13] वेदावेदाङ्ग –B,C. [14] वर्जयीत —A,D. [15] पर—A. [16] नाचार्येण स –A. [17] न शुद्ध्येत—B,C. संस्थितो ?—D. (संस्थितो ?)

## चतुर्थः पटलः

ीभगवान् उवाच—

विशेषेण पुनर्वक्ष्ये आचार्यस्य च[1] लक्षणम् ।
आकाशवायुतेजांसि पानीयं वसुधा तथा ॥ १ ॥
एता वै रात्रयः ख्याता[2] ह्यचैतन्या[3]स्तमोत्कटाः ।
रात्रीणामप्यथैतासां व्यतिरिक्तं निरञ्जनम् ॥ २ ॥
स यदा बुध्यते तत्त्वं तदा मुक्तोऽनुकीर्त्यते ।
तदासौ भगवान् विष्णुः परमात्मा न संशयः ॥ ३ ॥
अपि पापसमाचारः सर्वलक्षणवर्जितः ।
देशिकः स तु विज्ञेयः संसारार्णवतारकः ॥ ४ ॥
सर्वत्र व्यतिरिक्तं तु आत्मानं वेत्ति यो द्विजः ।
सर्वलक्षणहीनोऽपि स गुरुर्नात्र संशयः ॥ ५ ॥
चतुष्पात्-संहितां चेमां यो वेत्ति द्विजसत्तमः ।
सर्वलक्षणहीनोऽपि स यज्ञं[4] कर्तुमर्हति ॥ ६ ॥
पञ्चरात्रप्रबुद्धस्तु[5] सिद्धान्तस्यास्य तत्त्ववित्[6] ।
सर्वलक्षणहीनोऽपि आचार्यः स विशिष्यते ॥ ७ ॥
तारको जायते नैव[7] ज्ञानहीनो यदानघ ।
सम्यक्-प्रबुद्ध[8]तत्त्वार्थो गुरुस्तारक इष्यते ॥ ८ ॥
यस्य विष्णौ परा भक्तिर्यथा[9] विष्णौ तथा गुरौ ।
स एव स्थापको ज्ञेयः सत्यमेतद् वदामि ते ॥ ९ ॥
नाभिषेकं तु यः कुर्यात् प्रतिष्ठा[10]-लोभमोहितः ।
स याति नरकं घोरं सह शिष्यैर्न संशयः ॥ १० ॥

॥ ४ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे चतुर्थ आचार्यलक्षणपटलः ॥ ४ ॥

[1] तु—B,C. [2] प्रोक्ता—B,C. [3] स्तचैतन्या—A. [4] सर्वज्ञं—A,D. [5] च—B,C. [6] भाववित् B,C. [7] यज्ञः कार्यस्तु तेनैव—A,D. [8] संबुद्ध—A,D. [9] यस्य—A. [10] प्रतिष्ठां—B,C.

## पञ्चमः पटलः

श्रीभगवान्[क] उवाच—

इदं न हेतुवादिभ्यो वक्तव्यं नास्तिकाग्रतः[1] ।
जैमिनिः सुगतश्चैव नास्तिको नग्न एव च ॥ १ ॥
कपिलश्चाक्षपादश्च षडेते हेतुवादिनः ।
एतन्मतानुसारेण वर्तन्ते ये नराधमाः ॥ २ ॥
ते हेतुवादिनः प्रोक्तास्तेभ्यस्तन्त्रं[2] न दापयेत् ।
अथ दिङ्नियमोपेतं देवतास्थापनं शुभम् ॥ ३ ॥
पुरे दिशि यथा देवाः स्थाप्याः शृणु तथा मम ।
नगरग्राममध्ये तु ब्रह्मणः स्थानमुत्तमम् ॥ ४ ॥
आखण्डलस्य सूर्यस्य पूर्वेणायतनं शुभम् ।
स्वदिग्गतं कृशानोस्तु मातृणां चैव दक्षिणे ॥ ५ ॥
भूतानामालयो यस्मिन् धर्मराजालयः शुभः ।
चण्डिकायाः पितृणां च[ख] दैत्यानां नैरृते भवेत् ॥ ६ ॥
प्रचेतसः समुद्रस्य सिन्धूनां पश्चिमे भवेत् ।
फणिनां[3] चैव वायव्यां वायोः स्थानं च[4] तच्छुभम् ॥ ७ ॥
यक्षाधिपस्य स्कन्दस्य उदीच्यां स्थानमुच्यते ।
चण्डीशस्य महेशस्य ऐशान्यां स्थानमिष्यते[ग] ॥ ८ ॥
विष्णोः स्थानं तु सर्वत्र[5] कालभेदेन भिद्यते[6] ।
नगराभिमुखाः सर्वे स्थापिताः शुभदा नृणाम् ॥ ९ ॥
अज्ञानाद् वा प्रमादाद् वा कृता यदि पराङ्मुखाः ।
तदा शास्त्रादिभिर्विद्वान् उपायमिमाचरेत् ॥ १० ॥

[क] श्री—omitted in D. [1] यतः—B,C. [2] तन्त्रं तेभ्यः—B,C. [ख] तु—D. [3] सालिनां—B,C. [4] तु—A. [ग] ...मुच्यते—D. [5] स्थानं समासाद्य—B,C. [6] विद्यते—B,C.

तद्वर्णभूषणोपेतं तदेवायुधवाहनम्[7] ।
पुरस्याभिमुखं भित्तौ तं देवं तत्र संलिखेत् ॥ ११ ॥
पूर्वं देवकुलं पीड्य प्रासादं स्वल्पकं त्वथ[8] ।
समं वाप्यधिकं वापि न कर्तव्यं विजानता ॥ १२ ॥
उभयोर्द्विगुणां सीमां त्यक्त्वा चोच्छ्रयसंमिताम् ।
प्रासादं कारयेदन्यं नोभयं पीडयेद् बुधः ॥ १३ ॥
दिग्विशेषेण मे स्थानं शृणु त्वं[9] सुरसत्तम[10] ।
ग्राममध्येऽथवारण्ये[11] नदीनां सङ्गमे तथा ॥ १४ ॥
नगरस्य समन्ताच्च सर्वत्राहं प्रतिष्ठितः ।
भुक्तिमुक्तिप्रदः पुंसां विशेषं शृणु चापरम् ॥ १५ ॥
ऐन्द्र्यां विभूतये शस्त[12]माग्नेय्यां परिवर्जयेत्[13] ।
याम्यां प्रशान्तये शस्तं नैरृत्यां भयदं भवेत् ॥ १६ ॥
द्रव्यादीनां[14] प्रसिद्ध्यर्थं वारुण्यां राज्यसिद्धये ।
वायव्यां वर्जयेद् यत्नात् कौवेर्यां पुष्टिवर्धनम् ॥ १७ ॥
ऐशान्यां यजनं श्रेष्ठं सर्वसम्पत्करं नृणाम् ।
एवं ज्ञात्वा[15] विशेषेण ततो भूमिं परीक्षयेत् ॥ १८ ॥
लक्षणैर्देशिकश्रेष्ठो यथा तदधुनोच्यते ।
सुरभीणां रतिर्यत्र सवत्सानां वृषैः[16]सह ॥ १९ ॥
सुन्दरीणां रतिर्यत्र पुरुषैः सह सत्तम ।
राज्ञां पूर्वं गृहं यस्यामग्नीनां यज्वनां[17] तथा ॥ २० ॥
काश्मीरचन्दनामोदा[18] कर्पूरागुरुगन्धिनी ।
कमलोत्पलगन्धा च जातीचम्पकगन्धिनी[घ] ॥ २१ ॥
पाटलामल्लिकागन्धा नागकेशरगन्धिनी ।
दधिक्षीराज्यगन्धा च मदिरासवगन्धिनी ॥ २२ ॥

[7] भूषणम्—A. [8] तथा—B,C. [9] मे —A. [10] सुसमाहितः—B,C. [11] कान्तारे पर्वतेऽरण्य—B,C. [12] प्रशस्तं विज्ञेयं —A,D. [13] परिवर्जितम्—A,D. [14] क्व्यादीनां—B,C. [15] कृत्वा—B. [16] वत्सानां वृषभैः—B,C. [17] यज्ञिनां—A,D. [18] मोद —B,C. [घ] D. omits this line.

सुगन्धिव्रीहिगन्धा च शुभद्रव्यस्वना च या ।
सर्वेषां वर्णिनां भूमिः सर्वसाधारणा मता ॥ २३ ॥
दुर्गन्धा दुःखना ( दुःस्वना ? ) या च नानावर्णा च दुःपुरा* ।
वृत्तार्धचन्द्रसदृशा विस्ताराद् द्विगुणायता[19] ॥ २४ ॥
विकर्णा कर्णहीना च वक्रा सूचीमुखा[ङ] तथा ।
द्विकर्णा सूर्पसदृशी[च] गोमुखी च त्रिकोणिका ॥ २५ ॥
षडस्रा शूलसदृशी दन्तिपृष्ठोपमा च या ।
सरीसृपोपमा[छ] या च दिङ्मूढा शकटाकृतिः[20] ॥ २६ ॥

.... .... .... ....

एवंप्रकारा या भूमिर्वर्ज्या यत्नेन देशिकैः ॥ २७ ॥

॥ ५ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे पञ्चमो भूतलक्षणपटलः ॥ ५ ॥

## षष्ठः पटलः

श्रीभगवान् उवाच—

प्रासादस्य विशेषेन प्रोक्ता भूमि[1]श्चतुर्विधा ।
सुपद्मा भद्रिका पूर्णा धूम्रावेगिण्यथापरा § ॥ १ ॥
चन्दनागुरुकर्पूरगन्धा शुभस्वनार्जुनैः[2] ।
तिलकैर्नारिकेलैश्च बर्हिः[3]काशैश्च शोभिता ॥ २ ॥

* शब्दकल्पद्रुम citing this verse from हयशीर्ष under मन्दिर reads दुर्भगा ।
[19] यदा --B,C. [ङ] शुचीमुखा –D. [च] शूर्प—D. [छ] सरीसृपसमा –D. [20] दिङ्मुखा शकटोपमा—B,C. [1] भूमिः प्रोक्ता –B,C. § वैदिकसर्वस्व quoting from हयशीर्ष reads here—धूम्रा चेति सुरोत्तम । [2] पुन्नागैर्दिवि पार्श्वैश्च चन्दनैः सरलार्जुनैः—B,C.; चन्दनागुरु-पुन्नागशिंशपावकुलार्जुनैः—D. [3] बर्हि—B,C.

पद्मेन्दीवरसंयुक्ता सा सुपद्मेति विश्रुता ।
नदीसमुद्रायतनतीर्थपर्यन्त[4]शोभिता ॥ ३ ॥
पुष्पवृक्षसमाकीर्णा क्षीरि[5]वृक्षोपशोभिता ।
वनो[6]द्यानलतागुल्मफुल्लस्तम्बसमावृता ॥ ४ ॥
यज्ञिय[7]वृक्षसुक्षेत्रयुक्ता भद्रेति कीर्तिता ।
बकुलाशोकबहुला तथा पुन्नाम्रलोहितैः[8] ॥ ५ ॥
माधवीवेष्टिता या च मुद्गनिष्पावकोद्रवैः ।
शूकधान्यैश्च पुन्नागैर्गिरिपार्श्वगता च या ॥ ६ ॥
तोयं च स्वल्पकं[9] यस्यां पूर्णा सा परिकीर्तिता ।
बिल्वार्कस्नुहिपीलूनां वनैर्या परितो वृता ॥ ७ ॥
सशर्करा च कठिना युक्ता कण्टकिभिर्द्रुमैः ।
गृध्रगोमायुकाकानां श्येनानां याऽकुला कुलैः ॥ ८ ॥
धूम्रेति कीर्तिता सा तु तां यत्नात् परिवर्जयेत् ।
ततो[10] भूमिं परीक्षेत पूर्वोदक्प्लवनां[11] शुभाम् ॥ ९ ॥
असङ्कटां तथा च्छन्न्ना[12]मल्पतोयां परि[13]प्लुताम् ।
संपूर्यमाणे खाते तु तथाधिकमृदं शुभाम् ॥ १० ॥
कुसुम्भसदृशं वर्णं यस्यां न म्लानिमृच्छति ।
न निर्वाति तथा दीपं तोयं शीघ्रं न जीर्यति ॥ ११ ॥
श्वेतारुणा पीत[14]कृष्णा विप्रादीनां प्रशस्यते ।
आज्यासृग्गन्धमद्यानां तुल्यगन्धा च या भवेत् ॥ १२ ॥
मधुरा च कषाया च अम्ला च कटुका च या ।
कुशैः शरैस्तथा काशैर्दूर्वाभिर्या च[15] संवृता* ॥ १३ ॥

[4] पर्वत—B,C. [5] क्षीर—B,C. [6] वन—A.; वर—B,C. [7] यज्ञीय—B,C. [8] रोहितैः—B,C. [9] स्वल्पं च तोयकं—B,C. [10] ज्ञात्वा—B,C. [11] पूर्वोत्तरप्लवां—B,C. [12] च्छन्नां—B,C. [13] तोयपरिप्लुताम्—B,C. [14] अरुणपीत—B,C. [15] कुशैः काशैः शरैस्तद्वद्—B,C.; ...यातिसंवृता—A.; कुशैः शरैस्तथा काशैर्दूर्वाभिर्या च—D,E. * Cf. "कुशैः शरैस्तथा काशैर्दूर्वाभिर्या समन्विता। सा विप्रादिक्रमेणेह शस्यते वसुधानघ ॥" (सौरकाण्ड, २य पटल cited in Var. ed.)

तस्यां पुष्येऽथ नक्षत्रे कुर्याद् भूमिपरिग्रहम् ।
प्राकारसीमापर्यन्तं ततो भूतबलिं हरेत् ॥ १४ ॥
माषं[16] हरिद्राचूर्णं च सलाजा[17] दधिशक्तवः ।
एभि[18]र्भूतबलिं दत्त्वा सूत्र[19]मष्टाक्षरेण तु ॥ १५ ॥
पातयित्वा ततः शङ्कून् अष्टदिक्षु निवेशयेत् ।
राक्षसाश्चापि भूताश्च येऽस्मिंस्तिष्ठन्ति भूतले ॥ १६ ॥
ते सर्वे व्यपगच्छन्तु स्थानं कुर्यामहे हरेः ।
इत्यनुज्ञाप्य भूतादींस्तां भूमिं[20] परिशोधयेत् ॥ १७ ॥
आदित्यादिग्रहाणां च लोकपालैः समं कृती* ।
आज्यनिष्ठ[21]-विधानेन ततस्तु होममाचरेत् ॥ १८ ॥
चरुहोमं ततः कुर्यान्न मूलमन्त्रेण देशिकः ।
दद्यात् पूर्णाहुतिं[क] पश्चाद् वौषडन्तेन मन्त्रवित्[22] ॥ १९ ॥
वृषभौ कपिलौ गृह्य सवर्णौ वा[23] विचक्षणः ।
योजनार्थं हलस्यैव गृह्णीयादसनोद्भवम् ॥ २० ॥
प्राङ्मुखं योज्य मन्त्रज्ञो वस्त्रालङ्कारभूषितः ।
आसनीं यष्टिमादाय द्वादशाक्षरविद्यया ॥ २१ ॥
संमर्दनैः[24] समीकृत्य शुभ[ख]बीजानि योजयेत् ।
संप्राप्ते फलकाले तु[25] गोभिस्तत्[26] खादयेत् बुधः ॥ २२ ॥
पुनस्तां कर्षयित्वा तु समीकृत्य गृहं गुरुः ।
.... .... .... .... ॥ २३ ॥

॥ ६ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे षष्ठो भूतशुद्धिपटलः ॥ ६ ॥

[16] मांसं—A. [17] सलाज—B,C. [18] एतैः—B,C. [19] मन्त्र—B,C. [20] भूतादीन् भूमिं च—A. * *mss. read* लोकापालसमन्वितान् । We accept the reading from the हयशीर्ष in the शब्दकल्पद्रुम under मन्दिर । [21] आज्यं चरु—B,C. [क] पूर्णाहुतीः—E. [22] देशिकः—A,D. [23] समवर्णौ—B,C. [24] समर्धन—A.; समत्वेन—B,C., समर्दन—D., समादन—E. [ख] सत—E. [25] शोभने काले—A. [26] तं—B,C.

## सप्तमः पटलः

श्रीभगवान् उवाच—

मानोन्मानविभागार्थं मङ्गलं हस्तलक्षणम् ।[1]
सर्वकर्मप्रधानत्वात्[2] प्रोच्यमानं मया शृणु ॥ १ ॥
परमाण्वष्टकेनैव रथरेणुः प्रकीर्तितः ।
रथरेण्वष्टकेनैव त्रसरेणुः प्रकीर्त्यते[3] ॥ २ ॥
तैरष्टभिस्तु बालाग्रं लिक्षा तैरष्टभिः स्मृता ।
ताभिर्यूकाष्टभिः ख्यातास्ताश्चाष्टौ यवमध्यकम् ॥ ३ ॥
यवाष्टकैरङ्गुलं[4] स्याच्च् चतुर्विंशाङ्गुलः करः ।
चतुर्विंशाङ्गुलश्चान्यः स्वाङ्गुष्ठेनापि[5] सम्मितः ॥ ४ ॥
चतुरङ्गुलसंयुक्तः स्व[6]हस्तः पद्महस्तकः ।
एतै[7]र्हस्तैस्तु कुर्वीत प्रासादं याग[8]मण्डपम् ॥ ५ ॥
प्रतिमां पिण्डिकां वापि कुण्डं[9] मण्डलमेव च ।
तोरणं च ध्वजं चैव गुणाढ्यं पात्रमेव च ॥ ६ ॥
मानहीनं न कर्तव्यं फलप्राप्त्यर्थिभिः सदा ।
प्रशस्तं दारुमादाय सारवत् खदिरादिकम् ॥ ७ ॥
चतुरस्रं तु तद् दारु कारयित्वा तु शिल्पिना ।
वृत्तं[10] भूमिसमं कुर्यान् निर्व्रणं सुषमं तथा[11] ॥ ८ ॥
द्वादशाङ्गुलमायामं पर्व चाङ्गुलमुच्यते ।
मूले षडङ्गुलं चास्य परिणाहः स्वमानतः[12] ॥ ९ ॥
ह्रस्वाद्ध्रस्वतरं कार्यमग्रे स्याद् यवमात्रकम् ।
भूमिच्छेदसमं कुर्यान् मूलमग्रं सुसंमितम् ॥ १० ॥

1 This line is omitted in B,C. 2 प्रधानं च—B,C. 3 प्रकीर्तितः—B,C. लिख्या –D. 4 अङ्गुलः—B,C,D. 5 स्वाङ्गुष्ठेन तु –A,D. 6 सहस्तः –B,C. 7 एभिः—B,C. 8 यज्ञ –B,C. 9 कुण्ड—B,C. 10 वृत्त –B,C. 11 बुधः –B,C. 12 स्वपानतः –A. ; स्वनामतः—D.

एतद् यथाक्रमेणैव कथितं शङ्कुलक्षणम् ।
एवं निष्पाद्य वै शङ्कुं कुर्याद् दिक्साधनं गुरुः ॥ ११ ॥

॥ ७ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे सप्तमः शङ्कुलक्षणपटलः ॥ ७ ॥

## अष्टमः पटलः

श्रीभगवान् उवाच—

बाह्यवास्तुसमं कृत्वा[1] चतुरस्रं समन्ततः ।
भूमिं तोयसमां कृत्वा दर्पणोदरसन्निभाम्[2] ॥ १ ॥
द्वादशाङ्गुलमानेन चाष्टौ[3] वृत्तांस्तु भ्रामयेत् ।
मध्ये सु[4]निश्चलं शङ्कुं स्थाप्य छायां निरीक्षयेत् ॥ २ ॥
प्रवेशे निष्क्रमे तस्यां शङ्कुच्छायां निरूपयेत् ।
शङ्कुच्छायाग्रचिह्नाभ्यां[5] प्राक्प्रतीच्यौ प्रसाधयेत् ॥ ३ ॥
प्राक्प्रतीचीगते सूर्ये उदग्याम्ये प्रसाधयेत्[6] ।
विषुवे विमले व्योम्नि शङ्कुना साधयेद् दिशम् ॥ ४ ॥
शरद्वसन्तयोरेवमादित्यात् साधयेद् दिशम् ।
प्राचीं तु[क] पुष्यवेधेन चित्रास्वात्यन्तरेण वा ॥ ५ ॥
उदीचीं ध्रुववेधेन मध्ययोगेन चोन्नयेत् ।
चतुरस्रां शिलां गृह्य इष्टकां वा सुशोभनाम् ॥ ६ ॥
चतुर्दिक्षु निवेश्याथ सूत्रचिह्नं तु कारयेत् ।
एवं कृत्वा सूत्रचिह्नं[7] ब्राह्मणांस्तत्र भोजयेत् ॥ ७ ॥

[1] कुर्यात् —B,C. ; ...समीकृत्वा —D. [2] सम्मिताम् —B,C. [3] अष्टौ—B,C. [4] च—B,C. [5] -दृह्नाभ्यां—B,C. [6] निरीक्षयेत् —B,C. [क] वा—D. [7] ततो भूमौ—B,C.

वैष्णवान् पायसेनाग्रयान् द्वादशैव समाहितः[8] ।
मासाधिपानां तुष्ट्यर्थं सूत्रणं स्यादतः परम् ॥ ८ ॥
महामर्मोपमर्मादिज्ञानार्थं यत्नवान् भवेत् ।
दर्शनैः कीर्तनैः शब्दैर्यजमानस्य चेष्टितैः ॥ ९ ॥
यथावल्लक्षयेच्छल्यं वास्तुदेहे विचक्षणः ।
लङ्घनादथ सूत्रस्य दर्शनान्नामभाषणात् ॥ १० ॥
श्रवणादथ शब्दस्य जानीयाच्छल्यमादरात् ।
दर्शनं लङ्घनं यस्य गदितं[9] नामकीर्तितम् ॥ ११ ॥
तस्य सत्त्वस्य[ख] तच्छल्यं जानीयाल्लङ्घनादिभिः ।
आदिशेद् वास्तुतः शल्यं गृहिणोऽङ्गविकारतः ॥ १२ ॥
शकुनो दृश्यते वापि यस्य वा श्रूयते ध्वनिः ।
कीर्त्यते यस्य वा नाम शल्यं तस्य विनिर्दिशेत् ॥ १३ ॥
वास्त्वङ्गं सूत्रयेत् प्राज्ञः श्वेताम्बरधरः शुचिः ।
श्वेत[10]गन्धानुलिप्ताङ्गः सर्वालङ्कारभूषितः १४ ॥

.... .... .... ....

चतुःषष्टिं[11] तु प्रासादे एकाशीतिं[12] गृहे सदा ॥ १५ ॥
चतुरस्रीकृते क्षेत्रे ह्यष्टधो[13]भयभाजिते ।
कोणरेखां[14] ततो दत्त्वा सुर[15]भागांस्तु कल्पयेत् ॥ १६ ॥
शिवः कोणार्धतो ज्ञेयः पर्जन्यः पदसंस्थितः ।
द्विपदस्थो जयो ज्ञेयः सुरेशश्चैकपादकः ॥ १७ ॥
भास्करस्तु पदे ज्ञेयो द्विपदः सत्य इष्यते ।
भृशः पदस्थो विज्ञेयो[16] व्योम चैव पदार्धगः ॥ १८ ॥
हुताशनः पदार्धश्च[17] पूषा च पदसंस्थितः ।
वितथो द्विपदस्थश्च[18] पदैकस्थो गृहक्षतः ॥ १९ ॥

[8] समन्विताः—B,C. [9] रुदितं—B,C. [ख] सत्त्वस्य तस्य—D. [10] शुभ—B,C. [11] ...षष्टिः—B,C. [12] ...शीति –B,C. [13] ह्यस्तथौ –B,C. [14] ...रेफां—B,C. [15] रुद्र—B,C. [16] ज्ञातव्यो—B,C. [17] पदाधस्तु—B,C. [18] पदो ज्ञेयः –B,C.

वैवस्वतः पदैकस्थो गन्धर्वो द्विपदस्थितः ।
भृङ्गश्चैकपदे[19] ज्ञेयो मृगश्चार्धपदे स्थितः ॥ २० ॥
पितरश्चार्धतो ज्ञेयाः पदे दौवारिकस्तथा ।
सुग्रीवो द्विपदे[20] ज्ञेयो ह्येकस्थः पुष्पदन्तकः ॥ २१ ॥
यादसांपतिरेकस्थो ह्यसुरस्तु द्विसंस्थितः ।
शोष[21]श्चैकपदे ज्ञेयो ह्यर्धगः पाप इष्यते ॥ २२ ॥
रोगश्चार्धपदे ज्ञेयो नागश्चापि पदे स्थितः ।
यक्षश्च[22] द्विपदे ज्ञेयो भल्लाटः पदसंस्थितः ॥ २३ ॥
यक्षेश्वरः पदे ज्ञेयो नागराड् द्विपदे स्थितः ।
पदस्था श्रीमहादेवी अदितिश्चार्धसंस्थिता ॥ २४ ॥
आपो ज्ञेयास्तु पदगा ह्यापवत्सः[23] पदस्थितः[24] ।
चतुष्पदस्थो विज्ञेस्त्वर्यमा पूर्वम[25]ध्यगः ॥ २५ ॥
सविता तु पदे ज्ञेयः सावित्री च[26] पदे स्थिता ।
ततो विवस्वान् विज्ञेयश्चतुष्टयपद[27]स्थितः ॥ २६ ॥
इन्द्रश्चेन्द्रजयश्चैव एकैके संव्यवस्थितौ ।
मित्रश्चतुष्पदस्थश्च[28] पश्चिमे तु व्यवस्थितः ॥ २७ ॥
रुद्रः पदैकसंस्थो वै यक्ष्मा[29] चैक[30]पदे स्थितः ।
धराधरश्च विज्ञेयो ह्युत्तरे च चतुष्पदः[31] ॥ २८ ॥
चतुर्मुखश्चतुष्कस्थो मध्ये ज्ञेयः प्रजापतिः ।
देवतानुचरा बाह्ये सर्वे स्कन्दादयः स्थिताः ॥ २९ ॥

॥ ८ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके
आदिकाण्डे अष्टमो देवताविभागपटलः ॥ ८ ॥

[19] पदो—B,C. [20] पदो—B,C. [21] शोक—B,C. [22] मुख्यश्च—A,D. [23] ह्यापवन्ती—B,C.; ह्यापवती—D. [24] ...संस्थितः—A. [25] पूर्य—B,C. [26] तु—B,C. [27] चतुष्पादव्यवस्थितः—B,C. [28] तु—B,C. [29] ब्रह्मा -B,C. [30] चैव—B,C. [31] B drops "च चतुष्पदः"

## नवमः पटलः

श्रीभगवान् उवाच—

एवं प्रगृह्य[1] कोष्ठानि रजसापूर्य देशिकः ।
एतेषामेव देवानां बलिं दद्यात् तु कामिकम् ॥ १ ॥
ईशानाय प्रदातव्यं पायसं मधुना सह ।
पर्जन्याय जलं देयं गन्धपुष्पादि[2]वासितम् ॥ २ ॥
जयन्ताय प्रदातव्या पताका[3] पीतवर्णिका ।
सुरेश्वराय रत्नानि भास्कराय घृतं तथा ॥ ३ ॥
धूम्रकं[4] पीतवर्णं वा सत्ये दद्याद् वितानकम् ।
दद्याद् भृशे[5] पक्षिमांसं व्योमाय (?) श्रुव[6]मग्नये ॥ ४ ॥
पुष्णे धानाः सलाजास्तु सुवर्णं वितथे तथा ।
गृहक्षताय मध्वन्नं यमाय पिशितौदनम् ॥ ५ ॥
गन्धं गन्धर्वदेवाय भृङ्गे दद्यात् तु शाकुनम् ।
मृगे[7] तिल[8]यवांश्चैव पितृभ्यः कृसरं तथा ॥ ६ ॥
दौवारिके दन्तकाष्ठं सुग्रीवे यावकं तथा ।
पुष्पदन्ते कुशा देया वरुणे पद्ममुत्पलम् ॥ ७ ॥
असुराये[9]क्षवं देयं रसं शोषे[10] घृतौदनम् ।
यवाश्च[क] देयाः पापाय रोगाय घृतमण्डकम् ॥ ८ ॥
नागाय नागपुष्पाणि भक्ष्यान् मुख्याय दापयेत् ।
चित्रौदनं च भल्लाटे सोमाय मधुपायसम् ॥ ९ ॥
नागाय चापि शालूकं श्रियै सरसपायसम् ।
अदित्यै पूरिका देया क्षीरमद्भ्यो ददेद् बलिम् ॥ १० ॥

[1] प्रमृज्य—B,C. [2] पुष्पगन्ध—B,C. [3] पताकी—B,C. [4] धूम्राभं—B,C. [5] वृषे—B,C. [6] श्रव—B,C. [7] मुद्ग—A. [8] तिस—B,C. [9] गन्धर्वाय—B,C. [10] शोके—B,C. [क] यवास्तु—D.

दधि क्षीरं चापवत्से[11] अर्यम्णो लड्डुकं बलिम् ।
कुशोदकं सवित्रे च सावित्र्यै गुडपूपकम्[ख] ॥ ११ ॥
विवस्वते रक्तपुष्पं रक्तचन्दनमेव च ।
हरिद्रान्नं तथेन्द्राय साज्यमिन्द्रजयाय च ॥ १२ ॥
घृतपूरं[12] तु मित्राय रुद्राय गुडपायसम् ।
आमपक्वानि मांसानि प्रदद्याद् राजयक्ष्मणे ॥ १३ ॥
पृथ्वीधरायाममांसं सकुल्माषं बलिं हरेत् ।
साक्षतं सतिलं चैव पञ्चगव्यं तथा चरुम् ॥ १४ ॥
कुशान् गन्धं तथा पुष्पं ब्रह्मस्थाने निवेद[13]येत् ।
आममांसं पूर्वभागे सर्वं स्कन्दे तु सोदनम्[ग] ॥ १५ ॥
सितपद्मं घृतं मांसं विदार्यै चाग्निकोणके ।
कृसरापूपकं मांसमर्यम्णा[14]यैव दक्षिणे ॥ १६ ॥
पिष्टं[15] चैव तथा रक्तं पूतन्यै निरृते तथा ।
सासृङ्मांसं प्रदातव्यं जम्भकायैव[16] पश्चिमे ॥ १७ ॥
अस्थिखण्डैश्च सहितं रक्तपिण्डेन मिश्रितम् ।
प्रदेयं पापराक्षस्यै वायव्यां मांसमेव च ॥ १८ ॥
उत्तरे पिलिपिञ्छायै (?) सान्त्रं रक्तं बलिं हरेत् ।
चरक्यै[17] छागमांसानि ऐशान्यां दिशि दापयेत् ॥ १९ ॥
ततो भूतगणानां तु राक्षसानां सुरोत्तम ।
पिशाचानां गणानां तु बलिर्देयस्तु कामिकः ॥ २० ॥
एतान् वा पूजयेत् सर्वान् कुशपुष्पाक्षतैर्बुधः ।
एवं संपूजिता देवाः शान्तिपुष्टिप्रदा नृणाम् ॥ २१ ॥
अपूजिता विहिंसन्ति कारकं स्थापकं तथा ।
तस्मादेतांस्तु संपूज्य गन्धैः पुष्पैर्मनोहरैः ॥ २२ ॥

[11] चापवन्त्यै—A. ; चापवन्यै—D. [ख] गुडपुष्पकम्—D. [12] पूर्णं—B,C. [13] निवेशयेत्—B,C,D. [ग] सोदकम्—D. [14] मार्यम्णा—A. [15] पिण्डं—A. [16] जम्भकाय तु—B,C. [17] वाराह्यै—A,D.

प्रासादं कारयेद् विद्वान् गृहं वा सुरसत्तम ।

.... .... .... ... ॥ २३ ॥

॥ ६ ॥ इति हयशीर्षे महापञ्चरात्रे द्वादशसाहस्रिके

आदिकाण्डे नवमो बलिदानपटलः ॥ ६ ॥

## दशमः पटलः

श्रीभगवान् उवाच—

ब्रह्मस्थाने ततः कुर्याद् वासुदेवस्य पूजनम् ।

श्रियः संपूजनं कुर्याद् हृषीकेशगणस्य च ॥ १ ॥

पूजन च ततः कुर्याद् वासुदेवगणस्य च ।

गन्धार्घ्यपुष्पनैवेद्य[1]धूपदीपै[2]र्मनोहरैः[क] ॥ २ ॥

ततः संपूजयेत् तस्मिन् सर्वलोकधरां महीम् ।

सुरूपां प्रमदारूपां दिव्या[3]भरणभूषिताम् ॥ ३ ॥

ध्यात्वा समर्चयेद् देवीं परितुष्टां स्मिताननाम् ।

ततः प्रणम्य विज्ञाप्य तन्मयत्वेन[4] चिन्तयेत् ॥ ४ ॥

ततः स्वनाममन्त्रेण सर्वामरमयं परम् ।

ध्यात्वा समर्चयेद् भक्त्या[5] तत् तद् वास्तुमयं नरम् ॥ ५ ॥

ब्रह्मस्थाने ततो विद्वान् कुर्यादाधारमन्त्रतैः ।

तस्मिन् संस्थापयेत् कुम्भं वर्धन्या सह पूजितम् ॥ ६ ॥

हैमं वा राजतं वापि मृन्मयं वा दृढं नवम्[6] ।

सर्वबीजौषधीयुक्तं सुवर्णराजता[7]न्वितम् ॥ ७ ॥

[1] नैवेद्यैः—B,C. [2] धूपैर्दीपैः A; धूपदीप—C. [क] सुरोत्तम—D. [3] सर्वा —B,C.
[4] °त्वेना च—B,C. [5] तत्र—B,C,D. [6] नवं दृढम्—B,C. [7] रजान्वितम्—B,C.

रत्नगर्भं सुसम्पूर्णं[8] वस्त्रपूतेन वारिणा।
प्रशस्तपल्लवोपेतं श्वेतचन्दनचर्चितम् ॥ ८ ॥
पुष्पैः सुमालितं कृत्वा शस्तधूपै*र्विधूपितम्।
आहतेन तु शुक्लेन वस्त्रयुग्मेन वेष्टितम् ॥ ९ ॥
ब्रह्मस्थाने ततो मन्त्री कलसं स्थाप्य पूजयेत्।
तस्मिंश्चतुर्मुखं देवं प्रजेशं मन्त्रविग्रहम् ॥ १० ॥
गन्धैः[9] पुष्पैश्च धूपैश्च नैवेद्यैः[10] सुमनोहरैः।
ततो मण्डलबाह्ये तु प्राच्यां वै प्राङ्मुखः स्थितः ॥ ११ ॥
आचार्यो गृह्य संभारान् ग्रहादीं[11]स्तर्पयेत् सुरान्।
घृतैस्तिलैर्यवैर्मन्त्री ब्रह्मादींस्तर्पयेत् ततः ॥ १२ ॥
प्रजेशं तर्पयेद् विद्वान् आहुतीनां शतेन च[12]।
इतरान् दशभिर्देवान् आहुतीभिः प्रतर्पयेत् ॥ १३ ॥
दद्यात् पूर्णाहुतिं पश्चाद् वौषडन्तेन मन्त्रवित्।
ततः प्रणम्य विज्ञाप्य कृत्वा वै स्वस्तिवाचनम् ॥ १४ ॥
प्रगृह्य कर्करीं सम्यङ् मण्डलं तु प्रदक्षिणम्।
सूत्रमार्गेण देवेश तोयाधारांस्तु भ्रामयेत् ॥ १५ ॥
पूर्ववत् तेन मार्गेण सप्तबीजानि भ्रामयेत्[13]।
सुशोभनं शुभस्थानं तथा खातस्य कारयेत्[14] ॥ १६ ॥
ततो गर्तं खनेन्मध्ये[15] हस्तमात्रं प्रमाणतः।
चतुरङ्गुलमात्रं तद् अधः[16]खन्यात् सुसम्मितम् ॥ १७ ॥
गोमयेनोप[17]लिप्याथ चन्दनेन विभूषयेत्।
मध्ये दत्त्वा तु पुष्पाणि शुक्ला§न्यक्षतमेव च ॥ १८ ॥

[8] सुसम्पन्नम् —B,C. * गन्धपुष्पै—D. [9] गन्धं —A,D. [10] नैवेद्यैश्च —B,C. [11] ब्रह्मा तु—B,C.; ब्रह्मादीन् वैदिकसर्वस्व. [12] च —B,C. [13] संलिखेद् —B,C. [14] This line is omitted in A. [15] भूमौ—B,C.; स्मार्त भट्टाचार्य; देवीपुराण cited in वास्तुयागतत्त्व reads मध्य। [16] तु ह्यधः—B,C. [17] गोमयेन विलिप्याथ -B,C. § शुद्धा—D.

आचार्यः प्राङ्मुखो भूत्वा ध्यायेद्देवं चतुर्भुजम् ।
तूर्यमङ्गलघोषेण ब्रह्मघोषवरेण च ॥ १९ ॥
अर्घ्यं दद्यात् सुरश्रेष्ठ कुम्भतोयेन मन्त्रवित् ।
प्रगृह्य कर्करीं तावत् तद्गर्तं[18] पूरयेज् जलैः ॥ २० ॥
सर्वरत्नसमाकीर्णैर्विमलैः सुसुगन्धिभिः ।
तस्मिन् शुक्लानि पुष्पाणि प्रक्षिपेद् ओमिति स्मरन् ॥ २१ ॥
तदावर्तं परीक्षेत वेदाद्येनाक्षतं क्षिपेत् ।
शुभं स्याद् दक्षिणावर्तेऽशुभं वामे भवेत् ततः ॥ २२ ॥
बीजैः शालियवादीनां तं गर्तं पूरयेद् बुधः[19] ।
क्षेत्रजाभिः पवित्राभिर्मृद्भिर्गर्तं प्रपूरयेत् ॥ २३ ॥
एवं निष्पाद्य विधिना चार्घ्यदानं सुरोत्तम ।
सुवर्णं गां वस्त्रयुग्ममाचार्याय निवेदयेत् ॥ २४ ॥
कालज्ञस्थपती पूज्यौ वैष्णवान् शक्तितोऽर्चयेत् ।
